## आङोऽनुनासिकश्छन्दसि। (१२६/३५०८)

आङोऽचि परतः संहितायां छन्दसि विषयेऽनुनासिकादेशो भवति, स च प्रकृत्या भवति। 'अभ्र आँ अपः' (ऋ.५.४८.१)। 'गभीर आँ उग्रपुत्रे जिघांसतः' (ऋ.८.६७.११)। केचिद् 'आङोऽनुनासिकश्छन्दसि बहुलम्' इत्यधीयते। तेनेह न भवति, इन्द्रो बाहुभ्यामातरत्। आ अतरत्॥

## इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। (१२७/९१)

इकोऽसवर्णे अचि परतः शाकल्यस्याचार्यस्य मतेन [1]प्रकृत्या भवन्ति, ह्रस्वश्च तस्य इकः स्थाने भवति। दधि अत्र, दध्यत्र। [2]मधु अत्र, मध्वत्र। कुमारि अत्र, कुमार्यत्र। किशोरि अत्र, किशोर्यत्र। इकः इति किम्? [3]खट्वेन्द्रः। असवर्णे इति किम्? कुमारीन्द्रः। शाकल्यस्य ग्रहणं पूजार्थम्। आरम्भसामर्थ्यादेव हि यणादेशेन सह विकल्पः सिद्धः।

[६९२] सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्यः। (म.भा. ३.८९)

[4]सिति – 'अयं ते योनिर्ऋत्वियः' (ऋ. ३.२९.१०)। नित्यसमासे – व्याकरणम्। कुमार्यर्थम्।

[६९३] ईषा अक्षादिषु छन्दसि प्रकृति[5]भावमात्रं वक्तव्यम्। (म.भा. ३.९०)

'ईषा अक्षो हिरण्ययः' (ऋ. ८.५.२९)। 'का ईमरे पिशङ्गिला' (वा.सं. २३.५५)। पथा अगमन्॥

## ऋत्यकः। (१२८/९२)

[7]शाकल्यस्य ह्रस्वश्च इत्येतदनुवर्तते। ऋकारे[8] परतः शाकल्यस्याचार्यस्य मतेन अकः [9]प्रकृत्या भवन्ति ह्रस्वश्च तस्याकः स्थाने भवति। खट्व ऋश्यः। [10]माल ऋश्यः। [11]कुमारि ऋश्यः। होतृ ऋश्यः। ऋति इति किम्? [12]खट्वेन्द्रः। अकः इति किम्? वृक्षावृश्यः। सवर्णार्थमनिगर्थं च वचनम्॥

## अप्लुतवदुपस्थिते। (१२९/९८)

उपस्थितं नाम अनार्षः [13]इतिकरणः, समुदायादवच्छिद्य पदं येन स्वरूपेऽवस्थाप्यते। तस्मिन् परतः प्लुतः अप्लुतवद् भवति। प्लुतकार्यं प्रकृतिभावं न करोति। सुश्लोक३ इति सुश्लोकेति। [14]सुमङ्गल३ इति सुमङ्गलेति। वत्करणं किम्? अप्लुत इति उच्यमाने प्लुत एव[15] प्रतिषिध्यते। तत्र को दोषः? प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्, [16]अग्नी३ इति, वायू३ इति॥

---

1. प्रकृतिभावो फ. 2. उदाहरणमिदं नास्ति फ. 3. मालेन्द्रः फ. 4. सिति नास्ति ग. 5. भाव नास्ति क. 6. ईमिरे म.भा. पाठः 7. वाक्यमिदं नास्ति फ. 8. च इत्यधिकम् ह. 9. प्रकृतिभावः ब. 10. उदाहरणमिदं नास्ति क. 11. उदाहरणमिदं नास्ति ग.फ. 12. मालेन्द्रः फ. 13. इतिकारः फ. 14. सुमङ्गल्या इति फ. 15. निषिध्यते क. 16. अग्नीन् इति। वायून् इति ह.